## १२ द्वादश दशकः - उतथ्य जननम्

पुरा द्विजः कश्चन देवदत्तो नाम प्रजार्थं तमसा समीपे ।
कुर्वन् मखं गोभिल शाप वाचा लेभे सुतं मूढ मनन्त दुःखः ॥ १२-१॥

उतथ्य नामा ववृधे स बालो मूढस्तु दृष्टं न ददर्श किञ्चित् ।
श्रुतं न शुश्राव जगाद नैव पृष्टो न च स्नान जपादि चक्रे ॥ १२-२॥

इतस्ततोऽटन् समवाप्त गङ्गो जले निमज्जन् प्रपिबंस्तदेव ।
वसन् मुनीना मुटजेषु वेद मन्त्रांश्च शृण्वन् स दिनानि निन्ये ॥ १२-३॥

क्रमेण सत्सङ्ग विवृद्ध सत्त्वः सत्यव्रतः सत्य तपाश्च भूत्वा ।
नासत्यवाक् त्व त्कृपया स मूढोऽपि उन्मीलितान्त र्नयनो बभूव ॥ १२-४॥

कुलं पवित्रं जननी विशुद्धा पिता च सत्कर्मरतः सदा मे ।
मया कृतं नैव निषिद्ध कर्म तथाऽपि मूढोऽस्मि जनैश्च निन्द्यः ॥ १२-५॥

जन्मान्तरे किं नु कृतं मयाऽघं किं वा न विद्याऽर्थि जनस्य दत्ता ।
ग्रन्थोऽप्यदत्तः किमु पूज्यपूजा कृता न किं वा विधिवन्न जाने ॥ १२-६॥

नाकारणं कार्य मितीर्यते हि दैवं बलिष्ठं दुरतिक्रमं च ।
ततोऽत्र मूढो विफली कृतोऽस्मि वन्ध्य द्रुवन्निर्जल मेघवच्च ॥ १२-७॥

इत्यादि सञ्चिन्त्य वने स्थितः स कदाचि देकं रुधिराप्लुताङ्गम् ।
बीभत्सरूपं किटिमेष पश्यन् अय्यय्य इत्युत्स्वन मुच्चचार ॥ १२-८॥

शरेण विद्धः स किरि र्भयार्तः प्रवेपमानो मुनिवास देशे ।
अन्त र्निकुञ्जस्य गतश्च दैवात् अदृश्यता माप भयार्ति हन्त्रि ॥ १२-९॥

विना मकारं च विना च भक्तिं उच्चार्य वाग्बीज मनुं पवित्रम् ।
प्रसन्न बुद्धिः कृपया तवैष बभूव दूरीकृत सर्वपापः ॥ १२-१०॥

नाहं कविर्गान विचक्षणो न नटो न शिल्पादिषु न प्रवीणः ।
पश्यात्र मां मूढ मनन्य बन्धुं प्रसन्न बुद्धिं कुरु मां नमस्ते ॥ १२-११॥